# ॥ देहस्थ देवता चक्र स्तोत्रम् ॥

असुरसुरवन्दितमभिमतवरवितरणे निरतम् ।

दर्शनसताग्र्यपूज्यं प्राणतनुं गणपतिं वन्दे ॥ १ ॥

वरवीरयोगिनीगणसिद्धावलिपूजितांघ्रियुगलम् ।

अपहृतविनयजनार्तिं वटुकमपादानाभिदं वन्दे ॥ २ ॥

आत्मीयविषयभोगैः इन्द्रियदेव्यः सदा हृदम्भोजे ।

अभिपूजयन्ति यं तं चिन्मयमानन्दभैरवं वन्दे ॥ ३ ॥

उदयाभासचर्वणलीलां विश्वस्य या करोत्यनिशम् ।

आनन्दभैरवीं तां विमर्शरूपामहं वन्दे ॥ ४ ॥

अर्चयन्ती भैरवं या निश्चयकुसुमैः सुरेशपत्रस्था ।

प्रणमामि बुद्धिरूपां ब्रह्माणीं तामहं सततम्॥ ५॥

कुरुते भैरवपूजामनलदलस्थाभिमाना कुसुमैर्या।

नित्यमहङ्कृतिरूपां वन्दे तां शाम्भवीमम्बाम्॥ ६॥

विदधाति भैरवार्चा दक्षिणदलगा विकल्पकुसुमैर्या।

नित्यं मनःस्वरूपां कौमारीं तामहं वन्दे॥ ७॥

नैर्ऋतिदलगा भैरवमर्चयते शब्दकुसुमैर्या।

प्रणमामि शब्दरूपां नित्यं तां वैष्णवीं शक्तिम्॥ ८॥

पश्चिमदिग्दलसंस्था हृदयहरैः स्पर्शकुसुमैर्या।

तोषयति भैरवं तां त्वग्रूपधरां नमामि वाराहीम्॥ ९॥

वरतररूपविशेषैः मारुतदिग्दलनिषण्णदेहा या।

पूजयति भैरवं तामिन्द्राणीं त्वक्तनुं वन्दे ॥ १० ॥

धनपतिकिसलयनिलया या नित्यं विविधा षड्रसाहारैः ।

पूजयति भैरवं तां जिह्वाभिख्यां नमामि चामुण्डाम् ॥ ११ ॥

ईशदलस्था भैरवमर्चयते परिमलैर्विचित्रैर्या ।

प्रणमामि सर्वदा तां घ्राणाभिख्यां महालक्ष्मीम् ॥ १२ ॥

षड्दर्शनेषु पूज्यं षट्-त्रिंशत्तत्त्वसंवलितम् ।

आत्माभिख्यं सततं क्षेत्रपतिं सिद्धिदं वन्दे ॥ १३ ॥

संस्फुरदनुभवसारं सर्वान्तः सततसन्निहितम् ।

नौमि सदोदितमित्थं निजदेहगदेवता-चक्रम् ॥ १४ ॥

॥ इति शिवम् ॥

## || dehastha devatā cakra stotram ||

asurasuravanditamabhimatavaravitaraṇe niratam |

darśanasatāgryapūjyaṁ prāṇatanuṁ gaṇapatiṁ vande || 1 ||

varavīrayoginīgaṇasiddhāvalipūjitāṅghriyugalam |

apahṛtavinayajanārtiṁ vaṭukamapādānābhidaṁ vande || 2 ||

ātmīyaviṣayabhogaiḥ indriyadevyaḥ sadā hṛdambhoje |

abhipūjayanti yaṁ taṁ cinmayamānandabhairavaṁ vande || 3 ||

udayābhāsacarvaṇalīlāṁ viśvasya yā karotyaniśam |

ānandabhairavīṁ tāṁ vimarśarūpāmahaṁ vande || 4 ||

arcayantī bhairavaṁ yā niścayakusumaiḥ sureśapatrasthā |

praṇamāmi buddhirūpāṁ brahmāṇīṁ tāmahaṁ satatam || 5 ||

kurute bhairavapūjāmanaladalasthābhimānā kusumairyā |

nityamahaṅkṛtirūpāṁ vande tāṁ śāmbhavīmambām || 6 ||

vidadhāti bhairavārcā dakṣiṇadalagā vikalpakusumairyā |

nityaṁ manaḥsvarūpāṁ kaumārīṁ tāmahaṁ vande || 7 ||

nairṛtidalagā bhairavamarcayate śabdakusumairyā |

praṇamāmi śabdarūpāṁ nityaṁ tāṁ vaiṣṇavīṁ śaktim || 8 ||

paścimadigdalasaṁsthā hṛdayaharaiḥ sparśakusumairyā |

toṣayati bhairavaṁ tāṁ tvagrūpadharāṁ namāmi vārāhīm || 9 ||

varatararūpaviśeṣaiḥ mārutadigdalaniṣaṇṇadehā yā |

pūjayati bhairavaṁ tāmindrāṇīṁ dṛktanuṁ vande || 10 ||

dhanapatikisalayanilayā yā nityaṁ vividhā ṣaḍrasāhāraiḥ |

pūjayati bhairavaṁ tāṁ jihvābhikhyāṁ namāmi cāmuṇḍām || 11 ||

īśadalasthā bhairavamarcayate parimalairvicitrairyā |

praṇamāmi sarvadā tāṁ ghrāṇābhikhyāṁ mahālakṣmīm || 12 ||

ṣaḍdarśaneṣu pūjyaṁ ṣaṭ-triṁśattattvasaṁvalitam |

ātmābhikhyaṁ satataṁ kṣetrapatiṁ siddhidaṁ vande || 13 ||

saṁsphuradanubhavasāraṁ sarvāntaḥ satatasannihitam |

naumi sadoditamitthaṁ nijadehagadevatā-cakram || 14 ||

|| iti śivam ||